नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **28**

# S-71-Sanskritam (T.L.)

No. of Printed Pages – **12**

## माध्यमिक परीक्षा, 2018

## SECONDARY EXAMINATION, 2018

## तृतीय भाषा – संस्कृतम्

समय : $3\frac{1}{4}$ (सपाद होरात्रयम्)

अधिकतमांकाः 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. अधोलिखितस्य पाठ्यपुस्तकात् पठितगद्यांशस्य सप्रसङ्गं हिन्दी भाषायाम् अनुवादं लिखत – **5**

अनन्तरं सर्वे जालेन बद्धाः बभूवुः । ततो यस्य वचनात् तत्र अवलम्बितास्तं सर्वे तिरस्कुर्वन्ति । तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच "नायमस्य दोषः । विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतिकारश्चिन्त्यताम् । इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीमूय जालमादायोड्डीयताम् ।" इति विचिन्त्य सर्वे पक्षिणः जालमादायोत्पतिताः । अनन्तरं स व्याघ्रः सुदूराज्जालापहारकान् तान् अवलोक्य पश्चात् धावनम् अकरोत् ।

**अथवा**

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं सः रचयामास । तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत । स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान् । तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन् । स्वराज्ये शान्तिं संस्थाप्य "चावण्ड" नामकं स्थानं स्वराजधानीम् अकरोत् । तस्मिन् काले "चावण्ड" स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य, विद्यायाश्च प्रमुखकेन्द्रम् आसीत् ।

2. अधोलिखितस्य पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्गं हिन्दीभाषायाम् अनुवादं लिखत – **5**

विद्या विवादाय धनं मदाय,

शक्तिः परेषां परिपीडनाय ।

खलस्य साधोर्विपरीतमेतत्,

ज्ञानाय दानाय च रक्षणाय

**अथवा**

वर्षागमे चारूमरुं विहाय

क्वान्यत्र कस्यापि रमेत चित्तम् ।

सरःसु वर्षासमयेऽपि यस्मिन्,

शरत् – प्रसन्नं सलिलं चकास्ति ।।

3. अधोलिखितस्य पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्गं संस्कृते व्याख्या कार्या – **4**

न जातु दुःखं गणनीयम्

न च निजसौख्यं मननीयम् ।

कार्य-क्षेत्रे त्वरणीयम्

लोकहितं मम करणीयम् ।।

**अथवा**

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।

गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।।

4. अधोलिखितस्य पाठ्यपुस्तकात् पठितनाट्यांशस्य सप्रसङ्गं संस्कृते व्याख्या कार्या **3**

प्रथमा – वत्स एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।

बालः – कुत्र, देह्येतत् (इति हस्तं प्रसारयति)

द्वितीया – सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम् । गच्छ तत् मदीय उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृतिकामयूरस्तिष्ठति, तमस्योपहर ।

प्रथमा – तथा । (इति निष्क्रान्ता)

**अथवा**

सर्वदारः – (तथा निपुणं निरीक्षमाणः) महाराज ! मेवाड़–मन्त्री भामाशाहः इव कश्चन आगच्छन् प्रतीयते ।

प्रतापः – हुँ, किम् उक्तम् ! भामाशाहः ? तस्य कथम् इदं ज्ञातम् अभूत ? अस्तु तावत्, प्रतीक्षामहे तम् ।

(भामाशाहः धनराशिग्रन्थिम् आदाय आयाति)

भामाशाहः – (प्रणम्य) अन्नदातः ! सेवकं सन्त्यज्य क्व प्रस्थीयते श्रीमता ?

5. अधोलिखितेषु अष्टसु केषाञ्चन **षट्** प्रश्नानामुत्तराणि संस्कृतमाध्ययेन लिखत – **½ × 6 = 3**

(i) "जयसुरभारति !" इति पाठस्य रचयिता कः अस्ति ?

(ii) "संघे शक्तिः" इति पाठानुसारेण "अद्य प्रातरेव अनिष्टदर्शनं जातम्, न जाने किम् अनभिमतं दर्शयिष्यति ।" इति कः कथितवान् ?

(iii) "स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति कथनं कस्य कृतेः अस्ति ?

(iv) महाराणाप्रतापस्य राज्याभिषेकः कस्मिन् ग्रामे अभवत् ?

(v) मरुप्रदेशे व्याप्तानां मृत्युभोजनं, बालविवाहः, नार्युत्पीडनं, यौतुकप्रथादीनां कुप्रथानां निवारणाय सदैव कः सचेष्टः आसीत् ?

(vi) "मरु सौन्दर्यम्" इति पाठानुसारेण "शुष्कोऽपि नित्यं सरसः स देशः" इति केन प्रशंसितः ?

(vii) महाराजः सूरजमल्लः कस्य ज्येष्ठपुत्रः आसीत् ?

(viii) "यो यद्वपति बीजं हि लभते तादृशं फलम्" इति पाठानुसारेण कथं तेषां दायादानां मया प्रत्यपकारः कर्त्तव्यः ? इति केन चिन्तितम् ?

निर्देशः – प्रश्न संख्या 6 – 9 पर्यन्तं रेखाङ्कितपदमाधृत्य प्रश्न निर्माणं कुरुत –

6. अहिंसा परमो धर्मः । 1

7. पृथिव्यां त्रीणि रत्नानि सन्ति । 1

8. एतेन मम न अपमानः । 1

9. नायकेषु अन्यतमः सूरजमल्लः आसीत् । 1

10. प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत – 1½ × 2 = 3

11. अधोलिखितं गद्यांशं पठित्वा एतदाधारित – प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत :

दैनन्दिनव्यवहारे यः सहायतां करोति सः बन्धुः भवति । यदि विश्वे सर्वत्र एतादृशः भावः भवेत् तदा विश्वबन्धुत्वं सम्भवति । परन्तु अधुना संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति । मानवाः परस्परं न विश्वसन्ति । ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति । अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषां उपरि स्वकीयं प्रभुत्वं स्थापयन्ति । संसारे सर्वत्र विद्वेषस्य शत्रुतायाः हिंसायाः च भावना दृश्यते, देशानां विकासः अपि अवरूद्धः भवति । इयं महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात् । विश्वस्य जनेषु इयं भावना आवश्यकी । ततः विकसिताविकसितयोः देशयोः मध्ये स्वस्था स्पर्धा भविष्यति । सर्वे देशा ज्ञानविज्ञानयोः क्षेत्रे मैत्रीभावनया सहयोगेन च समृद्धिं प्राप्तुं समर्था भविष्यन्ति । सूर्यचन्द्रयोः प्रकाशः सर्वत्र समानरूपेण प्रसरति । प्रकृतिः अपि सर्वेषु समत्वेन व्यवहरति । तस्मात् अस्माभिः सर्वैः परस्परं वैर–भावम् अपहाय विश्वबन्धुत्वं स्थापनीयम् ।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । 1

(ख) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत –

(i) दैनन्दिन–व्यवहारे बन्धुः कः भवति ? **1**

(ii) समर्थाः देशाः कान् प्रति उपेक्षाभावं प्रदर्शयन्ति ? **1**

(iii) अधुना संसारे कस्य वातावरणम् अस्ति ? **1**

(iv) सर्वेषु समत्वेन का व्यवहरति ? **1**

(v) कयोः प्रकाशः सर्वत्र समानरूपेण प्रसरति ? **1**

(ग) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत –

(i) "मानवाः परस्परं न विश्वसन्ति" अत्र कर्तृपदं लिखत । **1**

(ii) "इयं महती आवश्यकता वर्तते" अत्र विशेष्यपदं लिखत । **1**

(iii) ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति, अत्र "ते" इति सर्वनामपदस्य स्थाने संज्ञापदं लिखत । **1**

(iv) "अधस्तात्" इति पदस्य गद्यांशात् चित्वा विलोमपदं लिखत । **1**

12. अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत –

(i) स्वागतम् **1**

(ii) दिग्गजः **1**

13. अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखत –

(i) पो + अनः **1**

(ii) रामः + च **1**

14. अधोलिखितरेखाङ्कित–पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत –

(i) रमेशः प्रतिवारं प्रयासं करोति । 1

(ii) असौ महाराजः अस्ति । 1

(iii) माता च पिता च गच्छतः । 1

15. अधोलिखितरेखाङ्कितपदेषु विभक्तिं तत् कारणं च लिखत ।

(i) ग्रामं परितः क्षेत्राणि सन्ति । 1

(ii) सीता गीतया सह पठति । 1

(iii) नगरात् पृथक् आश्रमः अस्ति । 1

16. कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्द–निर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखत –

(i) प्रसन्नो बालकः _______ । (शंक् + शानच्) 1

(ii) ______ गोपालः गच्छति । (पठ् + शतृ) 1

17. अधोलिखित वाक्ययोः रेखाङ्कितपदेषु प्रकृतिं प्रत्ययं च पृथक् कृत्वा लिखत –

(i) ज्ञानवान् सर्वत्र पूज्यते 1

(ii) चटका वृक्षे तिष्ठति 1

18. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत –

| इव, तत्र, यथा, सहसा |
|---|

(i) सूर्यः अग्निगोलकः _______ प्रतिभाति । **1**

(ii) यत्र गच्छति _______ तिष्ठति । **1**

(iii) कार्यस्य ______ निर्णयं न करणीयम् । **1**


प्रश्न संख्या **19 – 21** पर्यन्तम् अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत –


19. त्वम् पाठं लिखसि । **1**

20. रामेण पुस्तकं पठ्यते । **1**

21. मया साधुः दृश्यते । **1**

22. घटिकाचित्रस्य सहायतया अङ्कानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् । (रिक्तस्थाने)

(क) 


(ख) 


(क) सीमा प्रातः ________ विद्यालयं गच्छति । **1**

(ख) सा पुनः ________ गृहं आगच्छति । **1**

23. अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखत ।

(i) बालिकात्रयं प्रतिदिनम् उपवनं गच्छन्ति । **1**

(ii) चतुष्पथे बलिवर्दाः कलहं करोति । **1**

(iii) शिष्यः गुरुं निवेदयति । **1**

24. भवान् राजकीय – आदर्श – उच्च माध्यमिक विद्यालय कञ्चनपुरस्य दशम्याः कक्षायाः छात्रः सोमनाथः अस्ति ।

स्वविद्यालयस्य प्रधानाचार्याय आवश्यक कार्यवशात् पञ्चदिनस्य अवकाशार्थं प्रार्थनापत्रं लिखत । **½ × 8 = 4**

**अथवा**

भवान् रमेशः स्वकीयं पितरं प्रति स्वाध्यायविषये अधोलिखितपत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत –

| |
|---|
| सम्यक्, अस्माकम् , भृशम्, विहाय, सादरम् , अन्यत्, न्यूनताम्, मातरम् । |

जामनगरतः

दिनाङ्क : 18 मार्च 2018

परमपूजनीयेषु पितृचरणेषु (i) __________ प्रणतयः सन्तु । भवतां पत्रमधिगतम् । समाचारान् अधीत्य मे मनः (ii) __________ मोदतेतराम् । मईमासे (iii) __________ परीक्षा सम्पत्स्यते । सम्प्रति अध्ययनकर्म (iv) __________ चलति । संस्कृतव्याकरणं (v) __________ सर्वेषु विषयेषु दक्षतामापन्नोऽस्मि । व्याकरणस्यापि (vi) __________ शीघ्रमेव अपनेष्यामि । (vii) __________ प्रति मे सादरं प्रणतयः । (viii) __________ कुशलम् ।

भवत्कः सुतः

रमेशः

25. मञ्जूषायाः उपयुक्तपदानि गृहीत्वा "चिकित्सालय-दर्शनम्" इति विषये संवादं पूरयत - ½ × 8 = 4

| |
|---|
| तत्, त्वम्, पीडितः कुत्र, उपचारम्, के, अस्ति, चिकित्सालयभवनम् |

पुनीतः – सुरेश ! त्वं ______ गच्छसि ?

सुरेशः – पुनीत ! ______ अपि आगच्छ ।

पुनीतः – अरे ! ______ किं भवनम् अस्ति ।

सुरेशः – तत् ______ अस्ति । आवाम् अपि मातुलं द्रष्टुं चलावः ।

पुनीतः – सः केन रोगेण ______ अस्ति ।

सुरेशः – सः उच्चरक्तचापेन पीडितः ______ ।

पुनीतः – ते श्वेतप्रावारकधारकाः ______ सन्ति । ते किं कुर्वन्ति ?

सुरेशः – ते चिकित्सकाः सन्ति । ते ______ कुर्वन्ति ।

26. अधोलिखितषड्वाक्येषु केषाञ्चन **चतुर्णां** वाक्यानां संस्कृतभाषायाम् अनुवादं लिखत - 1 × 4 = 4

(i) माता पुत्र को उपदेश देती हैं ।

(ii) मुझे फल अच्छे लगते हैं ।

(iii) तीन बालिकाएँ इधर देखती हैं ।

(iv) कक्ष के बाहर शिक्षक हैं ।

(v) उसके बिना तुम नहीं जाते हो ।

(vi) उनके साथ सुनीता आई ।

27. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते **षट्** वाक्यानि निर्माय लिखत – **½ × 6 = 3**

| |
|---|
| बसयानम्, धारयन्ति, छत्रम्, बालाः वर्षायाम्, आरोहन्ति |




**अथवा**

अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयित्वा लिखत –

| |
|---|
| श्रेष्ठः, पवनः, प्रसृतः, वसन्त, उद्यानानाम्, षट् |

(i) शीतलः (i) ______ मन्दं मन्दं प्रवहति ।

(ii) सर्वत्र सुरभितकुसुमानां सुगन्धः (ii) ______ अस्ति ।

(iii) कुसुमाकरः (iii) ______ समागतः अस्ति ।

(iv) भारते (iv) ______ ऋतवः भवन्ति ।

(v) तेष्वयं वसन्तः (v) ______ अस्ति ।

(vi) वसन्ते (vi) ______ शोभा दर्शनीया भवति ।

28. अधोलिखितवाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत – (कथा दृष्ट्या) ½ × **6 = 3**

(i) एकदा कश्चित् प्रमत्तः गजः तत्र आगतवान् ।

(ii) अथ सा चटका व्यलपत् ।

(iii) चटकायाः नीडं भुवि अपतत्, तेन अण्डानि विशीर्णानि ।

(iv) पुरा एकस्मिन् वने एका चटका प्रतिवसति स्म ।

(v) कालेन तस्याः सन्ततिः जाता ।

(vi) वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत् ।